## (161) " कत्र शैथिल्ये " (X-चुरादिः-1915. सक. सेट्. उभ.)(अ)

अदन्तः ।

अदन्तपाठसामर्थ्यात् णिचो वैकल्पिकत्वम् । अन्यथा उपधाकार्याभावात् अदन्तपाठो व्यर्थः स्यात् ।

कत्रकः-त्रिका, चिकत्रयिषकः-षिका, कत्रकः-त्रिका, [1]चिकत्रिषकः-षिका ;[2]

कत्रयिता-त्री, चिकत्रयिषिता-त्री, कत्रिता-त्री, चिकत्रिषिता-त्री ;

कत्रयन्-न्ती, चिकत्रयिषन्-न्ती, कत्रन्-न्ती, चिकत्रिषन्-न्ती ;

कत्रयमाणः, चिकत्रयिषमाणः ; —

कत्रयिष्यन्-न्ती-ती, चिकत्रयिषिष्यन्-न्ती-ती, कत्रिष्यन्-न्ती-ती, चिकत्रिषिष्यन्-न्ती-ती ;

कत्रयिष्यमाणः, चिकत्रयिषिष्यमाणः ; —

[3]कत् ; — —

कत्रितम्-[A]तः, चिकत्रयिषितः, कत्रितः, चिकत्रिषितः-तवान् ;

कत्रः, चिकत्रयिषुः, कत्रः, चिकत्रिषुः ; —

कत्रयितव्यम् , चिकत्रयिषितव्यम् , कत्रितव्यम् , चिकत्रिषितव्यम् ;

कत्रणीयम् , चिकत्रयिषणीयम् , कत्रणीयम् , चिकत्रिषणीयम् ;

कत्र्यम् , चिकत्रयिष्यम् , कत्र्यम् , चिकत्रिष्यम् ;

ईषत्कत्रः-दुष्कत्रः-सुकत्रः ; —

कत्र्यमाणः, चिकत्रयिष्यमाणः, कत्र्यमाणः, चिकत्रिष्यमाणः ;

कत्रः, चिकत्रयिषः, कत्रः, चिकत्रिषः ; —

कत्रयितुम् , चिकत्रयिषितुम् , कत्रितुम् , चिकत्रिषितुम् ;

कत्रणा, चिकत्रयिषा, कत्रा, चिकत्रिषा ; —

---

(अ) 'कर्त' इति क्षीरस्वाम्यादिसम्मतः पाठः ।

1. णिजभावपक्षे केवलधातोस्सनि रूपम् ।

2. णिजभावपक्षे अनेकाच्त्वाद्धातोः यङ् न ।

3. 'संयोगान्तलोपे—यणः प्रतिषेधो वाच्यः ; न वा झलो लोपात् ; बहिरङ्गलक्षणत्वाद्वा' (वा. 8-2-23) इति भाष्यपर्यालोचनया—'कलत्रमाचक्षाणः' इत्यत्रेव अकृत्रिमयणघटितानां प्रयोगाणां—शब्दरत्नकारैरनभिधानं प्रपञ्चितमिह स्मर्तव्यम् ।

A. 'दुष्पारदुश्चरिततीरणकृत्यथेशो नो चक्षमे पुटयितुं तमकत्रितोष्मा ॥' धा. का. 5-93.